मस्तनञ्। तथा तस्य च भावेन षष्ठी चेत्युदितं द्वयम्। सम्बन्धस्याष्टकस्यास्य क्रिययैवाधार्य्यताम्” इत्युक्तेस्तस्य क्रियायामेवान्वयः। सम्बोधनार्थे च प्रथमा।

**सम्भली** स्त्री सम्यक् भलते सम्+भल-अच् गौरा० ङीष्। कुट्टिन्याम् परपुरुषेण सह अन्यस्त्रिया योजयित्र्याम् अमरः। तालव्यादि तत्रार्थे भरतः।

**सम्भव** पु० सम्+भू-अप्। १उत्पत्तौ २आधेयस्याधारे समावेशनयोग्यत्वरूपे व्यापारे ३उत्कटकोटिकसन्देहे गदा०। ४सङ्गते। अपादाने अप्। ५हेतौ। कर्त्तरि अच्। ६मेलके त्रि० मेदि०। ७अपाये च अजयः। पौराणिकमतसिद्धे ८बुद्धिभेदे ९तत्प्रमाणे च तदेतन्मतम् तत्त्वकौमुद्यां प्रदर्श्य “सम्भवस्तु यथा खार्य्यां द्रोणाढकप्रस्थाद्यवगमः सचानुमानमेव खारीत्वं हि द्रोणाद्यविनाभूतं प्रतीतं खार्य्यां द्रोणादिसत्त्वमवगमयतीति” अनुमानान्तर्गततया प्रमाणान्तरत्वं दूषितम्। खारीत्वं खारीपरिमाणं महापरिमाणे स्वावान्तरपरिमाणसमावेशोऽनुभवसिद्धः तथा च खारीपरिमाणं द्रोणादिपरिमाणव्यापकमिति व्यापकस्थित्या व्याप्यस्थितेरावश्यकत्वादनुमानेनैव गतार्थतेत्यर्थः। “न चतुष्ट्वमैतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्” गौ० सू० भाष्ये “सम्भवोनाम अविनाभाविनोऽर्थस्य सत्त्वग्रहणम्। यथा द्रोणस्य सत्त्वग्रहणात् आढकस्य सत्त्वग्रहणम् एवम् आढकस्य सत्त्वग्रहणात् प्रस्थादिसत्त्वग्रहणम्” उक्तम्। तद्वृत्तौ च “अविनाभाववृत्त्या च सम्बद्धयोः समुदायसमुदायिनोः समुदायेन इतरस्य ग्रहणं सम्भवः तच्चानुमानमेव” इत्युक्तम्।

**सम्भव्य** पु० सम्+भू-कर्त्तरि यत्। १कपित्थे शब्दच० २सम्भाविनि त्रि०। [३सम्भूहे ४सामग्र्यां च मेदि०।

**सम्भार** पु० सम्+भृ-घञ्। १परिपूर्णतायां त्रिका० २सम्भूतौ

**सम्भावन** न० सम्+भू-णिच्-ल्युट्। १अर्थालङ्कारभेदे अलङ्कारशब्दे ४०७ पृ० दृश्यम्। २व्याकरणोक्ते क्रियासु योग्यताध्यवसाये ३लिङर्थभेदे ३उत्कटकोटिकसंशयरूपे ४ज्ञानभेदे च गदाधरः। युच्। सम्भवनापि उक्तार्थे स्त्री

**सम्भावित** त्रि० सम्+भू-णिच्-क्त। सम्भवयुक्ते पदार्थे।

**सम्भाषण** न० सम्+भाष-ल्युट्। १सम्यक्कथने २परस्परकथने च।

**सम्भिन्न** त्रि० सम्+भिद-क्त। १विदलिते २भेदान्विते ३सम्यग्विकसिते च “करैरिन्दोरन्तस्फुरित इव सम्भिन्नमुकुलः” इति वेणीसंहारः।

**सम्भूति** स्त्री सम्+भू-क्तिन्। १विभवे २ईश्वरस्यैश्वर्य्यभेदे च “सम्भूतिं य उपासते” इति श्रुतिः।

**सम्भूयसमुत्थान** न० सम्भूय मिलित्वा सम्यगुत्तिष्ठन्त्यनेन सम्+उद्+स्था-करणे ल्युट्। १मिलित्वा वणिजां वाणिज्यादिकर्मकरणे २तद्विषयके विवादभेदे च तत्स्वरूपादिकं वीरमि० उक्तं यथा

“अथ सम्भूयसमुत्थानाख्यव्यवहारपदम्। तस्य स्वरूपमाह नारदः “वणिक्प्रभृतयो यत्र कर्म सम्भूय कुर्वते। तत् सम्भूयसमुत्थानं व्यवहारपदं स्मृतम्” इति। वणिक्प्रभृतय इत्यनेन ऋत्विङ्नर्त्तककर्षकादीनां ग्रहणम्। यद्यपि फलभूतस्य स्वर्गस्य ऋत्विग्गामित्वाभावादात्मनेपदस्यानुपपन्नत्वेन प्रभृतिशब्देन ऋत्विग्ग्रहणमनुचितम्। तथापि आत्मनेपदाऽविवक्षयेदमुक्तम् च ऋत्विङ्मात्रे आत्मनेपदाविवक्षणे अन्यांशे च विवक्षणे वैरूप्यप्रसङ्ग इति वाच्यम्। सम्भूयकर्त्तृत्वमात्रस्य लक्षणत्वेनान्यत्र वास्तवतत्सत्त्वेऽपि लक्षणवैयर्थ्यप्रसङ्गाभावात्। न च चिन्तामणिकृता कर्त्रभिप्राय इत्यस्य कर्त्रभिप्रायविषये कर्त्रिच्छाविषये क्रियाफल इति व्याख्यातत्वादृत्विजामपि सफलं यजमानस्य कर्म भवत्विति वेतनोपरागेणेच्छा सम्भवत्येवेत्यात्मनेपदविवक्षायामपि का क्षतिरिति वाच्यम्। कर्त्रभिप्राये कर्त्तृगामिनीत्यस्यैव व्याख्यानस्य महाभाष्याद्यनेकग्रन्थसम्मतत्वेनान्यादृशव्याख्यानस्य महाभाष्यादिविरुद्धत्वात्। सह वाणिज्यादिकरणे अधिकारिणो दर्शयति बृहस्पतिः “कुलीनदक्षानलसैः प्राज्ञैर्नाणकवेदिभिः। आयव्ययज्ञैः शुचिभिः शूरैः कुर्य्यात् सह क्रियाम्” इति। क्रियां कृतकर्षिशिल्पस्तेयवाणिज्यरूपाम्। नाणकविज्ञानं वाणिज्यक्रियायामुपयुज्यते। आयव्ययज्ञानमात्रं कर्षिक्रियायाम्। शिल्पिक्रियायां सङ्गीतक्रियायां च प्राज्ञत्वम्। क्रतौ कुलीनत्वप्राज्ञत्वशुचित्वानि। स्तेये तु शूरत्वमात्रमुपयुज्यते। दक्षत्वानलसत्वे सर्वत्रोपयुज्येते। अतएवाऽदक्षादीन्निषेधयति स एव “अशक्तालसरोगार्त्तमन्दभाग्यानिराश्रयाः। वाणिज्याद्याः सहैतैस्तु न कर्त्तव्या बुधैः क्रियाः” इति। निराश्रयाः मूलधनरहिताः। ये तु सम्भूय वाणिज्यादिक्रियां कुर्वन्ति ते द्रव्यानुरोधेन लाभादिभाजो भवन्तीत्याह नारदः “समोऽतिरिक्तो हीनो वा तत्रांशो यस्य यादृशः। क्षयव्ययौ तथा वृद्धिस्तस्य तस्य तथाविधा” इति। बृहस्पतिरपि